www.prepp.in

Test Booklet Code & Serial No.
प्रश्नपत्रिका कोड व क्रमांक

**C**

# Paper-II
# SANSKRIT

**Signature and Name of Invigilator**

1. (Signature) .........................................
   (Name) .................................................
2. (Signature) .........................................
   (Name) .................................................

Seat No. [ ][ ][ ][ ][ ][ ]
(In figures as in Admit Card)

Seat No. ..............................................................
(In words)

OMR Sheet No. [ ][ ][ ][ ][ ][ ]
(To be filled by the Candidate)

## JUN - 04219

**Time Allowed : 2 Hours]** **[Maximum Marks : 200**

Number of Pages in this Booklet : **16** Number of Questions in this Booklet : **100**

**Instructions for the Candidates**

1. Write your Seat No. and OMR Sheet No. in the space provided on the top of this page.
2. This paper consists of **100** objective type questions. Each question will carry *two* marks. *All* questions of Paper II will be compulsory.
3. At the commencement of examination, the question booklet will be given to the student. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as follows :
   (*i*) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal or open booklet.
   (*ii*) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to missing pages/questions or questions repeated or not in serial order or any other discrepancy should not be accepted and correct booklet should be obtained from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given. The same may please be noted.
   (*iii*) After this verification is over, the OMR Sheet Number should be entered on this Test Booklet.
4. Each question has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.
   **Example :** where (C) is the correct response.
   (A) (B) ● (D)
5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done at the end of this booklet.
8. If you write your Name, Seat Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, you will render yourself liable to disqualification.
9. You have to return original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry the Test Booklet and duplicate copy of OMR Sheet on conclusion of examination.
10. Use only Blue/Black Ball point pen.
11. Use of any calculator or log table, etc., is prohibited.
12. There is no negative marking for incorrect answers.

**विद्यार्थ्यांसाठी महत्त्वाच्या सूचना**

1. परिक्षार्थींनी आपला आसन क्रमांक या पृष्ठावरील वरच्या कोपऱ्यात लिहावा. तसेच आपणांस दिलेल्या उत्तरपत्रिकेचा क्रमांक त्याखाली लिहावा.
2. सदर प्रश्नपत्रिकेत 100 बहुपर्यायी प्रश्न आहेत. प्रत्येक प्रश्नास **दोन** गुण आहेत. या प्रश्नपत्रिकेतील **सर्व** प्रश्न सोडविणे अनिवार्य आहे.
3. परीक्षा सुरू झाल्यावर विद्यार्थ्याला प्रश्नपत्रिका दिली जाईल. सुरुवातीच्या 5 मिनीटांमध्ये आपण सदर प्रश्नपत्रिका उघडून खालील बाबी अवश्य तपासून पहाव्यात.
   (*i*) प्रश्नपत्रिका उघडण्यासाठी प्रश्नपत्रिकेवर लावलेले सील उघडावे. सील नसलेली किंवा सील उघडलेली प्रश्नपत्रिका स्विकारू नये.
   (*ii*) पहिल्या पृष्ठावर नमूद केल्याप्रमाणे प्रश्नपत्रिकेची एकूण पृष्ठे तसेच प्रश्नपत्रिकेतील एकूण प्रश्नांची संख्या पडताळून पहावी. पृष्ठे कमी असलेली/कमी प्रश्न असलेली/प्रश्नांचा चुकीचा क्रम असलेली किंवा इतर त्रुटी असलेली सदोष प्रश्नपत्रिका सुरुवातीच्या 5 मिनिटातच पर्यवेक्षकाला परत देऊन दुसरी प्रश्नपत्रिका मागवून घ्यावी. त्यानंतर प्रश्नपत्रिका बदलून मिळणार नाही तसेच वेळही वाढवून मिळणार नाही याची कृपया विद्यार्थ्यांनी नोंद घ्यावी.
   (*iii*) वरीलप्रमाणे सर्व पडताळून पाहिल्यानंतरच प्रश्नपत्रिकेवर ओ.एम.आर. उत्तरपत्रिकेचा नंबर लिहावा.
4. प्रत्येक प्रश्नासाठी (A), (B), (C) आणि (D) अशी चार विकल्प उत्तरे दिली आहेत. त्यातील योग्य उत्तराचा रकाना खाली दर्शविल्याप्रमाणे ठळकपणे काळा/निळा करावा.
   **उदा. :** जर (C) हे योग्य उत्तर असेल तर.
   (A) (B) ● (D)
5. या प्रश्नपत्रिकेतील प्रश्नांची उत्तरे **ओ.एम.आर. उत्तरपत्रिकेतच दर्शवावीत.** इतर ठिकाणी लिहिलेली उत्तरे तपासली जाणार नाहीत.
6. आत दिलेल्या सूचना काळजीपूर्वक वाचाव्यात.
7. प्रश्नपत्रिकेच्या शेवटी जोडलेल्या कोऱ्या पानावरच कच्चे काम करावे.
8. जर आपण ओ.एम.आर. वर नमूद केलेल्या ठिकाणा व्यतिरिक्त इतर कोठेही नाव, आसन क्रमांक, फोन नंबर किंवा ओळख पटेल अशी कोणतीही खूण केलेली आढळून आल्यास अथवा असभ्य भाषेचा वापर किंवा इतर गैरमार्गांचा अवलंब केल्यास विद्यार्थ्याला परीक्षेस अपात्र ठरविण्यात येईल.
9. परीक्षा संपल्यानंतर विद्यार्थ्याने मूळ ओ.एम.आर. उत्तरपत्रिका पर्यवेक्षकांकडे परत करणे आवश्यक आहे. तथापि, प्रश्नपत्रिका व ओ.एम.आर. उत्तरपत्रिकेची द्वितीय प्रत आपल्याबरोबर नेण्यास विद्यार्थ्यांना परवानगी आहे.
10. फक्त निळ्या किंवा काळ्या बॉल पेनचाच वापर करावा.
11. कॅलक्युलेटर किंवा लॉग टेबल वापरण्यास परवानगी नाही.
12. चुकीच्या उत्तरासाठी गुण कपात केली जाणार नाही.

www.prepp.in

Prepp
Your Personal Exams Guide



Prepp Your Personal Exam Guide

www.prepp.in
Prepp
Your Personal Exams Guide



# Sanskrit
## Paper II
# संस्कृत
## प्रश्नपत्रिका II

**Time Allowed : 120 Minutes]** **[Maximum Marks : 200**

**Note :** This Paper contains **Hundred (100)** multiple choice questions. Each question carrying **Two (2)** marks. Attempt *All* questions.

**सूचना :** या प्रश्नपत्रिकेत एकूण **शंभर (100)** बहुपर्यायी प्रश्न दिलेले आहेत. प्रत्येक प्रश्नाला **दोन (2)** गुण आहेत. **सर्व** प्रश्न सोडवा.

1. रामायणे सीताहरणप्रसङ्गः कस्मिन् काण्डे वर्णितः ?
   (A) किष्किन्धाकाण्डे (B) अरण्यकाण्डे
   (C) सुन्दरकाण्डे (D) अयोध्याकाण्डे

2. पर्वणां योग्यं क्रमं विचिनुत :
   (A) आदि सभा वनम् विराटम्
   (B) आदि वनम् विराटम् सभा
   (C) आदि विराटम् वनम् सभा
   (D) आदि विराटम् सभा वनम्

3. उचितं सत्यासत्यपर्यायं विचिनुत :
   (*a*) 'धर्मादर्थश्च कामश्च स धर्मः किं न सेव्यते' इत्युक्तिः महाभारते नास्ति।
   (*b*) 'मा निषाद प्रतिष्ठां त्वमगमः' इत्युक्तिः महाभारतसंबन्धिनी नास्ति।
   (*c*) 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इत्युक्तिः रामायणसंबन्धिनी अस्ति।
   (*d*) 'यन्नेहास्ति न तत्क्वचित्' इत्युक्तिः महाभारतसंबन्धिनी अस्ति।
   (A) असत्यम् असत्यम् सत्यम् सत्यम्
   (B) असत्यम् सत्यम् सत्यम् असत्यम्
   (C) असत्यम् सत्यम् असत्यम् सत्यम्
   (D) असत्यम् सत्यम् सत्यम् सत्यम्

4. समूहादसंगतं दूरीकुरत :
   (A) गजेन्द्रमोक्षः (B) द्यूतक्रीडा
   (C) मयसभा (D) सेतुबन्धः

5. रिक्तस्थानं पूरयत :
   ............ इतीदं महाभारतस्य खिलं पर्व विद्यते।
   (A) अनुशासनम् (B) स्वर्गारोहणम्
   (C) महाप्रस्थानिकम् (D) हरिवंशः

6. उचितं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | अहिंसा | (*p*) | नियमः |
| (*b*) | सन्तोषः | (*q*) | दीर्घसूक्ष्मः |
| (*c*) | प्राणायामः | (*r*) | ध्यानम् |
| (*d*) | प्रत्ययैकतानता | (*s*) | वैरत्यागः |

| | | | | |
|---|---|---|---|---|
| (A) | *ap* | *bq* | *cr* | *ds* |
| (B) | *ar* | *bs* | *cp* | *dq* |
| (C) | *as* | *bp* | *cq* | *dr* |
| (D) | *aq* | *br* | *cs* | *dp* |

7. वेदान्तसारानुसारं त्रिगुणात्मकं भावरूपं किम् ?
   (A) ज्ञानम् (B) अज्ञानम्
   (C) विज्ञानम् (D) संज्ञानम्

www.prepp.in
Prepp Your Personal Exams Guide



8. अधोनिर्दिष्टेषु युग्मपर्यायेषु योग्यं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | गुणवादः | (*p*) | अग्निर्हिमस्य भेषजम् |
| (*b*) | अनुवादः | (*q*) | इन्द्रोवृत्रायवज्रमुदयच्छत् |
| (*c*) | निषेधः | (*r*) | आदित्यो यूपः |
| (*d*) | भूतार्थवादः | (*s*) | घटो नास्ति |

(A) *ap* *bq* *cr* *ds*

(B) *aq* *bs* *cp* *dr*

(C) *as* *br* *cq* *dp*

(D) *ar* *bp* *cs* *dq*

9. रिक्तस्थानं पूरयत :

योगप्रणाडिकया कर्मास्रवतीति स योगः .........।

(A) समाधिः (B) कर्मकौशलम्

(C) आस्रवः (D) दीर्घः

10. बौद्धेषु शून्यवादिनः के विद्यन्ते ?

(A) माध्यमिकाः (B) योगाचाराः

(C) सौत्रान्तिकाः (D) वैभाषिकाः

11. पुरुषः साङ्ख्यकारिकासु कथं वर्णितः ?

(A) प्रकृतिः – विकृतिः

(B) न प्रकृतिर्न विकृतिः

(C) न प्रकृतिः केवलं विकृतिः

(D) प्रकृतिः केवलं न विकृतिः

12. लिङ्गशरीरे कति अवयवाः ?

(A) त्रयोदश (B) पञ्चदश

(C) सप्तदश (D) एकादश

13. रिक्तस्थानं पूरयत :

............. कर्माशयप्रचये क्षेत्रीभूताः क्लिष्टाः।

(A) सुखहेतुकाः (B) दुःखहेतुकाः

(C) क्षयहेतुकाः (D) क्लेशहेतुकाः

14. योग्यं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | क्षिप्तम् | (*p*) | चित्तवृत्तिः |
| (*b*) | सवितर्कः | (*q*) | प्रमाणम् |
| (*c*) | निद्रा | (*r*) | चित्तम् |
| (*d*) | अनुमानम् | (*s*) | समाधिः |

(A) *ar* *bs* *cp* *dq*

(B) *ap* *bq* *cr* *ds*

(C) *as* *br* *cq* *dp*

(D) *aq* *bp* *cs* *dr*

15. योग्यं सत्यासत्यपर्यायं विचिनुत :

(*a*) वेदान्तसारस्य प्रयोजनं तु ऐश्वर्यप्राप्तिः।

(*b*) गुरुः परमकृपया अध्यारोपापवादन्यायेन शिष्यमुपदिशति।

(*c*) सूक्ष्मशरीराणि अष्टादशावयवानि लिङ्ग-शरीराणि।

(*d*) प्राणो नाम प्राग्गमनवान् अक्षिस्थानवर्ती।

(A) असत्यम् असत्यम् सत्यम् सत्यम्

(B) सत्यम् सत्यम् असत्यम् सत्यम्

(C) असत्यम् सत्यम् असत्यम् असत्यम्

(D) सत्यम् असत्यम् सत्यम् असत्यम्

www.prepp.in

Prepp
Your Personal Exams Guide



16. रिक्तस्थानं पूरयत :

वेदान्तसारानुसारम् अधिकारी तु ...............

(A) विज्ञाता (B) ज्ञाता

(C) प्रमाता (D) अनुकर्ता

17. योग्यं सत्यासत्यपर्यायं विचिनुत :

(*a*) ब्रह्मण: जिज्ञासा ब्रह्मविज्ञासा।

(*b*) अत: शब्द: प्रयोजनार्थे।

(*c*) अथ अप्रसिद्धं ब्रह्म नैव शक्यं जिज्ञासितुम्।

(*d*) सर्वो हि नात्मास्तित्वं प्रत्येति।

(A) असत्यम् सत्यम् असत्यम् सत्यम्

(B) सत्यम् सत्यम् सत्यम् असत्यम्

(C) सत्यम् असत्यम् सत्यम् असत्यम्

(D) असत्यम् सत्यम् असत्यम् सत्यम्

18. अधोनिर्दिष्टेषु: समीचीनं युग्मपर्यायं विचिनुत :

(*a*) गुणविधि: (*p*) व्रीहीनवहन्ति

(*b*) विशिष्टविधि: (*q*) यजेत स्वर्गकाम:

(*c*) नियमविधि: (*r*) दध्ना जुहोति

(*d*) अपूर्वविधि: (*s*) सोमेन यजेत

(A) *ar* *bs* *cp* *dq*

(B) *ap* *bq* *cr* *ds*

(C) *as* *br* *cq* *dp*

(D) *aq* *bp* *cs* *dr*

19. परिसंख्या कतिविधा ?

(A) द्विविधा (B) त्रिविधा

(C) चतुर्विधा (D) पञ्चविधा

20. अधोनिर्दिष्टेषु युग्मपर्यायेषु योग्यं विचिनुत :

(*a*) मत्वर्थलक्षणाभयान्ना-मधेयत्वम् (*p*) अग्निहोत्रं जुहोति

(*b*) वाक्यभेदभयान्नामधेयत्वम् (*q*) श्येनेनाभिचरन् यजेत

(*c*) तत्प्रख्यशास्त्रान्नामधेयत्वम् (*r*) उद्भिदा यजेत पशुकाम:

(*d*) तद्व्यपदेशान्नामधेयत्वम् (*s*) चित्रया यजेत पशुकाम:

(A) *as* *br* *cq* *dp*

(B) *ap* *bq* *cr* *ds*

(C) *ar* *bs* *cp* *dq*

(D) *aq* *bp* *cs* *dr*

21. रिक्तस्थानं पूरयत :

शास्त्रविहितस्य शास्त्रान्तरेण प्रतिषेधे ............

(A) पर्युदास: (B) विकल्प:

(C) अर्थवाद: (D) वाक्यभेद:

22. अधोनिर्दिष्टेषु युग्मपर्यायेषु योग्यं विचिनुत :

(*a*) निष्प्रकारकं ज्ञानं (*p*) अनुमिति:

(*b*) परामर्शजन्यं ज्ञानम् (*q*) विरुद्ध:

(*c*) व्यतिरेकमात्र व्याप्तिकम् (*r*) निर्विकल्पकम्

(*d*) साध्याभावव्याप्तो हेतु: (*s*) केवलव्यतिरेकि

(A) *ar* *bp* *cs* *dq*

(B) *ap* *bq* *cr* *ds*

(C) *aq* *bs* *cp* *dp*

(D) *as* *br* *cq* *dr*

23. परार्थानुमानस्य कति अवयवा: सन्ति ?

(A) त्रय: (B) चत्वार:

(C) पञ्च (D) षट्

24. व्याप्यत्वासिद्ध: कतिविध: ?

(A) द्विविध: (B) त्रिविध:

(C) चतुर्विध: (D) पञ्चविध:

25. याज्ञवल्क्यस्मृत्यनुसारं कीदृशो ब्राह्मण: नियोक्तव्य: ?

(A) सर्वधर्मवित् (B) सर्वार्थवित्

(C) सर्वकामवित् (D) सर्ववादवित्

26. याज्ञवल्क्यस्मृत्यनुसारं, कयोर्विरोधे न्याय: बलवान् ?

(A) श्रुत्यो: (B) मन्त्रिणो:

(C) स्मृत्यो: (D) स्मृत्याचारयो:

27. मनुस्मृतिमनुसृत्य, अभिवादने कृते विप्र: किं ब्रूयात् ?

(A) आयुष्मान् भव (B) कीर्तिमान् भव

(C) श्रद्धावान् भव (D) धनवान् भव

28. मनुस्मृत्यनुसारं कस्मिन् मासेऽन्नप्राशनं कार्यम् ?

(A) तृतीये (B) चतुर्थे

(C) पञ्चमे (D) षष्ठे

29. रिक्तस्थानं पूरयत :

................ सर्वविद्यानामुपाय: सर्वकर्मणाम्।
आश्रय: सर्वधर्माणां शश्वदान्वीक्षिकी मता॥

(A) प्रदीप: (B) सन्दीप:

(C) दीप: (D) विद्युद्दीप:

30. धृतराष्ट्रस्य कन्या का ?

(A) गान्धारी (B) राधा

(C) दु:शला (D) अम्बा

31. साहित्यशास्त्रसम्बद्धं पुराणं किम् ?

(A) मार्कंडेयपुराणम् (B) कालिकापुराणम्

(C) भविष्यपुराणम् (D) अग्निपुराणम्

32. अश्वघोष विरचितमस्ति :

(A) सौन्दरनन्दम्

(B) रघुवंशमहाकाव्यम्

(C) दशकुमारचरितम्

(D) हर्षचरितम्

33. मात्तौ गौ चेत् किं छन्द: ?

(A) शालिनी (B) मालिनी

(C) वसन्ततिलका (D) शिखरिणी

34. महाकाव्ये न्यूनतमा: कति सर्गा: भवितुमर्हन्ति ?

(A) पञ्चदश (B) विंशति:

(C) सप्त (D) अष्टौ

www.prepp.in
Prepp
Your Personal Exams Guide



35. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत।

| | | | |
|---|---|---|---|
| (*a*) | वासवदत्ता | (*p*) | भासः |
| (*b*) | प्रतिमा | (*q*) | सुबन्धुः |
| (*c*) | दशकुमारचरितम् | (*r*) | बाणभट्टः |
| (*d*) | कादम्बरी | (*s*) | दण्डी |

(A) *ap* *bs* *cq* *dr*
(B) *aq* *bp* *cs* *dr*
(C) *aq* *bp* *cr* *ds*
(D) *ar* *bp* *cq* *ds*

36. रिक्तस्थानं पूरयत :
कौटिलीयार्थशास्त्रानुसारं गृहस्थस्य भृत्येषु ............... शेषभोजनं च।
(A) विभागः (B) त्यागः
(C) संविभागः (D) भागः

37. अधस्तन-वाक्यानां सत्यासत्यपर्यायेषु योग्यं विचिनुत :
(*a*) 'अर्थो हि कन्या परकीय एव।' इत्युल्लेखः मालविकाग्निमित्रे अस्ति।
(*b*) 'पुराणमित्येव न साधु सर्वम्।' इत्युल्लेखः वेणीसंहारे दृश्यते।
(*c*) 'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।' इत्युक्तिः कालिदासस्य।
(*d*) 'सहसा विदधीत न क्रियाम्।' इत्युक्तिः बाणभट्टस्य।
(A) सत्यम् असत्यम् सत्यम् असत्यम्
(B) असत्यम् असत्यम् असत्यम् सत्यम्
(C) असत्यम् सत्यम् असत्यम् असत्यम्
(D) असत्यम् असत्यम् असत्यम् असत्यम्

38. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु योग्यं विचिनुत :
(*a*) डिमः शान्तरसप्रधानः।
(*b*) भाणे हास्यरसस्य योजना नास्ति।
(*c*) उत्सृष्टिकांकः करुणरसप्रधानः अस्ति।
(*d*) प्रहसनं हास्यरसप्रधानम्।
(A) सत्यम् असत्यम् सत्यम् असत्यम्
(B) असत्यम् असत्यम् असत्यम् सत्यम्
(C) असत्यम् असत्यम् सत्यम् सत्यम्
(D) असत्यम् सत्यम् सत्यम् सत्यम्

39. अधस्तनवर्गयोः युग्मपर्यायेषु समीचीनं विचिनुत :

| | | | |
|---|---|---|---|
| (*a*) | कादम्बरी | (*p*) | सुदक्षिणा |
| (*b*) | रघुवंशम् | (*q*) | उमा |
| (*c*) | कुमारसंभवम् | (*r*) | दमयन्ती |
| (*d*) | नैषधीयचरितम् | (*s*) | महाश्वेता |

(A) *aq* *bp* *cs* *dr*
(B) *as* *bq* *cr* *dp*
(C) *as* *bp* *cq* *dr*
(D) *ap* *bs* *cq* *dr*

40. "इति हेतुस्तदुद्भवे" इत्यत्र तत् शब्दस्य कोऽर्थः ?
(A) शब्दः (B) अर्थः
(C) ध्वनिः (D) काव्यम्

41. 'बुद्धिस्तु मा गान्मम।' इत्युक्तिः कस्मिन् नाटके अस्ति ?
   (A) मालविकाग्निमित्रे (B) मुद्राराक्षसे
   (C) वेणीसंहारे (D) स्वप्नवासवदत्ते

42. रत्नावली नाटिकायां प्रधाननायिका अस्ति :
   (A) वासवदत्ता (B) पद्मावती
   (C) सुसंगता (D) सागरिका

43. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत :
   (*a*) कारुण्यं भवभूतिरेव तनुते।
   (*b*) काव्येषु प्रकरणं रम्यम्।
   (*c*) अभिज्ञान शाकुन्तले तृतीयोऽङ्कः विशेष प्रसिद्धः।
   (*d*) नान्द्यन्ते ततः प्रविशति सूत्रधारः इति सूचना कालिदासस्य नाट्यकृतिषु दृश्यते।
   (A) सत्यम् असत्यम् सत्यम् सत्यम्
   (B) सत्यम् असत्यम् असत्यम् असत्यम्
   (C) सत्यम् असत्यम् असत्यम् सत्यम्
   (D) असत्यम् असत्यम् असत्यम् सत्यम्

44. अधोनिर्दिष्टेषु कं कालिदासः स्ववाङ्मये न निर्दिशति ?
   (A) भासम् (B) सौमिल्लिम्
   (C) कविपुत्रम् (D) राजशेखरम्

45. अधस्तन युग्मपर्यायेषु समीचीनं विचिनुत :
   (*a*) मेघदूतम् (*p*) भासः
   (*b*) उत्तररामचरितम् (*q*) कालिदासः
   (*c*) वेणीसंहारम् (*r*) भवभूतिः
   (*d*) अविमारकम् (*s*) भट्टनारायणः
   (A) *aq* *bp* *cs* *dr*
   (B) *aq* *br* *cs* *dp*
   (C) *ap* *br* *cq* *ds*
   (D) *ar* *bq* *cs* *dp*

46. रिक्तस्थानं पूरयत :
   गद्यशब्दः .................. धातुतः निष्पन्नः।
   (A) वद् (B) गद्
   (C) नद् (D) भाष्

47. सुरभेः सुतायाः अभिधानं किम् ?
   यस्याः सेवार्थं दिलीपः आदिष्टः वसिष्ठेन।
   (A) कामधेनुः (B) नन्दिनी
   (C) माया (D) कल्पा

48. 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य नायकः दुष्यन्तः अस्ति :
   (A) धीरोदात्तः (B) धीरोद्धतः
   (C) धीरप्रशान्तः (D) धीरललितः

49. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(a) व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने।

(b) शब्दचित्रं तु अवरं स्मृतम्।

(c) वाच्य एव वाक्यार्थ इत्यन्विताभिधान-वादिनः।

(d) धावकादीनाम् इव यशः।

(A) सत्यम् सत्यम् असत्यम् असत्यम्

(B) असत्यम् सत्यम् सत्यम् असत्यम्

(C) असत्यम् सत्यम् असत्यम् असत्यम्

(D) सत्यम् सत्यम् सत्यम् असत्यम्

50. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(a) ध्वनिसंप्रदायस्य प्रवर्तकः आनन्दवर्धनः।

(b) अभिव्यक्तिवादस्य पुरस्कर्ता अभिनवगुप्तः।

(c) रससूत्रस्य रचयिता शङ्कुकः।

(d) रीतिरात्मा काव्यस्येति भामहः।

(A) सत्यम् सत्यम् असत्यम् सत्यम्

(B) सत्यम् असत्यम् सत्यम् असत्यम्

(C) सत्यम् सत्यम् सत्यम् असत्यम्

(D) सत्यम् सत्यम् असत्यम् असत्यम्

51. अधस्तनेषु समीचीनं युग्मपर्यायं विचिनुत :

| | | | |
|---|---|---|---|
| (a) | काव्यप्रकाशः | (p) | कुन्तकः |
| (b) | वक्रोक्तिजीवितम् | (q) | जगन्नाथ पंडितः |
| (c) | रसगङ्गाधरः | (r) | क्षेमेन्द्रः |
| (d) | औचित्यविचारचर्चा | (s) | मम्मटः |

(A) *ar* *bs* *cp* *dq*

(B) *as* *bp* *cq* *dr*

(C) *ap* *bq* *cs* *dr*

(D) *aq* *bp* *cr* *ds*

52. अधस्तनवाक्यानां सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(a) कविसृष्टिः नियतिकृतनियमसहिता।

(b) कविसृष्टिः सुखदुःखमोहस्वभावा।

(c) शब्दोऽत्र त्रिधा।

(d) चतुष्टयी शब्दानां प्रवृत्तिः।

(A) असत्यम् सत्यम् सत्यम् असत्यम्

(B) असत्यम् असत्यम् सत्यम् सत्यम्

(C) सत्यम् असत्यम् सत्यम् असत्यम्

(D) असत्यम् असत्यम् असत्यम् सत्यम्

53. मम्मटानुसारं 'उपादानलक्षणायाः' उदाहरणमस्ति :

(A) कुन्ताः प्रविशन्ति

(B) कर्मणि कुशलः

(C) गङ्गायां घोषः

(D) गतोऽस्तमर्कः

www.prepp.in
Prepp Your Personal Exams Guide



54. अधस्तनवाक्येषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(*a*) विभावानुभावव्यभिचारिवियोगात् रसनिष्पत्तिः।

(*b*) काकुः ध्वनेर्विकारः।

(*c*) व्यञ्जना प्राधान्येन अष्टधा।

(*d*) काव्यसृष्टिः नवरसरुचिरा।

(A) सत्यम् सत्यम् असत्यम् सत्यम्

(B) सत्यम् सत्यम् सत्यम् असत्यम्

(C) असत्यम् सत्यम् असत्यम् सत्यम्

(D) असत्यम् सत्यम् असत्यम् असत्यम्

55. नायकानां प्राधान्येन कति भेदास्सन्ति ?

(A) चत्वारः (B) पञ्च

(C) षट् (D) सप्त

56. 'स्वस्था भवन्तु कुरुराजसुताः सभृत्याः।' इत्युल्लेखः कुत्र वर्तते ?

(A) उत्तररामचरिते

(B) अभिज्ञानशाकुन्तले

(C) मालविकाग्निमित्रे

(D) वेणीसंहारे

57. मेघदूते यक्षस्य शापान्तः कदा ?

(A) मकरसंक्रान्तौ

(B) शरत्पूर्णिमायाम्

(C) देवप्रबोधिन्याम् एकादश्याम्

(D) देवशयन्याम् एकादश्याम्

58. अधोनिर्दिष्टेषु युग्मपर्यायेषु समीचीनं विचिनुत :

| | |
|---|---|
| (*a*) शप् | (*p*) परोक्षे |
| (*b*) यङ् | (*q*) सार्वधातुकप्रत्ययः |
| (*c*) लिट् | (*r*) क्रियातिपत्तौ |
| (*d*) लृङ् | (*s*) क्रियासमभिहारे |

(A) *aq* *bp* *cs* *dr*

(B) *ar* *bq* *cp* *ds*

(C) *aq* *bs* *cp* *dr*

(D) *as* *br* *cq* *dp*

59. महाराजहर्षवर्धनस्य स्वहस्ताक्षरं कस्मिन् ताम्रपटे ?

(A) बांसखेडा इत्याख्ये

(B) कनौज इत्याख्ये

(C) थानेसर इत्याख्ये

(D) दिल्ली इति

60. मन्दसोर इत्यत्र यशोवर्मा लेखानुसारं कः हूणराजः पराजितः ?

(A) मिहिरकुलः (B) मिहिरभोजः

(C) तोरमाणः (D) हर्षः

61. चालुक्यराज्ञः पुलकेशिद्वितीयस्य ऐहोळेप्रशस्तेः लेखकः कः ?

(A) रविवर्मा (B) रविकीर्तिः

(C) रविशर्मा (D) रविदासः

62. रिक्तस्थानं पूरयत :

तद्रूपकमभेदो य ...............

(A) उपमानोपमेययोः (B) उक्तानुक्तयोः

(C) सन्देहभ्रान्त्योः (D) श्लेषदृष्टान्तयोः

63. रोदसी' इति कयोः विशेषणम् ?

(A) मित्रावरुणयोः (B) द्यावापृथिव्योः

(C) उषासानक्तयोः (D) विपाट्शुतुद्र्योः

64. पृथिवीसूक्तस्य ऋषिरस्ति :

(A) घोरः (B) अथर्वा

(C) विश्वामित्रः (D) भरद्वाजः

65. मॅक्सम्यूलर इत्यस्य मतेन संवादसूक्तानि सन्ति :

(A) आख्यानकाव्ययोनिः

(B) संस्कृतनाट्ययोनिः

(C) नाट्यांशरूपाण्येव

(D) आधुनिकगीतयोनिः

66. अधोनिर्दिष्टेषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(*a*) 'चराति चरतो भगः' इति वाक्यांशः शुनःशेपकथायां वर्तते।

(*b*) कितवसूक्तं लौकिकसूक्तेषु अन्तर्भवति।

(*c*) 'शूर्पेण जुहुयात्। तेन हि अन्नं क्रियते' इत्यस्मिन ब्राह्मणवाक्ये हेतुः निर्दिष्टः।

(*d*) दर्शेष्ट्यां सान्नायं हविः होतव्यः।

(A) सत्यम् असत्यम् सत्यम् असत्यम्

(B) सत्यम् सत्यम् असत्यम् असत्यम्

(C) असत्यम् सत्यम् असत्यम् सत्यम्

(D) सत्यम् सत्यम् सत्यम् सत्यम्

67. 'यो जात एव प्रथमो मनस्वान्' इति प्रतीकेन ज्ञायमानं सूक्तं केन दृष्टम् ?

(A) वसिष्ठेन (B) प्रस्कण्वेन

(C) गृत्समदेन (D) विश्वामित्रेण

68. अधोनिर्दिष्टेषु समीचीनं युग्मपर्यायं विचिनुत :

(*a*) अग्निहोत्रम् — (*p*) इष्टिः

(*b*) अग्निष्टोमः — (*q*) हविर्यज्ञः

(*c*) दर्शयागः — (*r*) सोमयज्ञः

(*d*) पञ्चमहायज्ञाः — (*s*) पाकयज्ञाः

(A) *ap* *bq* *cr* *ds*

(B) *ar* *bs* *cp* *dq*

(C) *aq* *br* *cp* *ds*

(D) *as* *bp* *cq* *dr*

69. अधोनिर्दिष्ट युग्मपर्यायेषु समीचीनं विचिनुत :

(*a*) अ॒ग्निम् — (*p*) आद्युदात्तः

(*b*) उ॑षः — (*q*) अन्तोदात्तः

(*c*) सू॒नरी॑ — (*r*) सर्वानुदात्तः

(*d*) गृ॒णा॒ति — (*s*) मध्योदात्तः

(A) *ap* *bq* *cr* *ds*

(B) *as* *br* *cp* *dq*

(C) *aq* *bp* *cs* *dr*

(D) *ar* *bs* *cq* *dp*

www.prepp.in

Prepp
Your Personal Exams Guide



70. अनुस्वारस्य ययि परत: किं भवति ?

(A) पूर्वसवर्ण: (B) सवर्णदीर्घ:

(C) परसवर्ण: (D) पूर्वरूपमेकादेश:

71. केनोपनिषदि क: आत्मविद्याम् आप्नोति ?

(A) भृगु: (B) अग्नि:

(C) वायु: (D) इन्द्र:

72. कति रात्री: नचिकेता: यमगृहे अतिष्ठद् इति कठोपनिषदि वर्णितम् ?

(A) दश (B) नव

(C) तिस्र: (D) पञ्च

73. कस्य कामाय सर्वं प्रियं भवति इति बृहदारण्यकोपनिषदि कथितम् ?

(A) स्वात्मन: (B) निजात्मन:

(C) देवात्मन: (D) आत्मन:

74. कस्याम् उपनिषदि पञ्चकोशसङ्कल्पना विद्यते ?

(A) तैत्तिरीयोपनिषदि (B) ईशोपनिषदि

(C) केनोपनिषदि (D) कठोपनिषदि

75. अधोनिर्दिष्टेषु योग्यं सत्यासत्यपर्यायं विचिनुत :

(*a*) आत्मा वाऽरे द्रष्टव्य: श्रोतव्य: मन्तव्य: निदिध्यासितव्य:।

(*b*) तत्र कोऽन्यात् क: प्राण्याद् यदेष आकाश आनन्दो न स्यात्।

(*c*) केनेषितं पतति प्रेषितं मन:।

(*d*) ॐ क्रतो: स्मर: क्रतुं स्मर।

| | (*a*) | (*b*) | (*c*) | (*d*) |
|---|---|---|---|---|
| (A) | सत्यम् | असत्यम् | असत्यम् | सत्यम् |
| (B) | सत्यम् | सत्यम् | सत्यम् | सत्यम् |
| (C) | असत्यम् | सत्यम् | सत्यम् | असत्यम् |
| (D) | असत्यम् | असत्यम् | सत्यम् | सत्यम् |

76. 'त्रि' इत्यस्य स्त्रियां क आदेशो भवति ?

(A) त्रय: (B) त्र्य:

(C) त्रे: (D) तिसृ

77. अधोनिर्दिष्ट युग्मानां समीचीनां तालिकां विचिनुत :

(*a*) पुष्पसूत्रम् (*p*) ज्योतिषम्

(*b*) कौशिकसूत्रम् (*q*) श्रौतसूत्रम्

(*c*) वैतानसूत्रम् (*r*) गृह्यसूत्रम्

(*d*) लगधम् (*s*) प्रातिशाख्यम्

| | | | | |
|---|---|---|---|---|
| (A) | *ap* | *bq* | *cr* | *ds* |
| (B) | *as* | *br* | *cq* | *dp* |
| (C) | *aq* | *bp* | *cs* | *dr* |
| (D) | *ar* | *bs* | *cp* | *dq* |

78. वेदपुरुषस्य हस्तौ स्तः ...............

(A) कल्पसूत्राणि (B) शिक्षासूत्राणि

(C) ज्योतिषसूत्राणि (D) शिवसूत्राणि

79. 'सर्वाणि नामान्याख्यातजानि' अस्य सिद्धान्तस्य संस्थापकाः विद्यन्ते :

(A) वैयाकरणाः

(B) नैरुक्ताः एव

(C) नैरुक्ताः शाकटायनश्च

(D) गार्ग्याः

80. अधोनिर्दिष्टेषु युग्मपर्यायेषु समीचीनं विचिनुत :

(*a*) पक्तिः (*p*) आख्यातम्

(*b*) व्रजति (*q*) उपसर्गः

(*c*) परा (*r*) नाम

(*d*) सीम् (*s*) निपातः

(A) *ap* *br* *cs* *dq*

(B) *aq* *bs* *cp* *dr*

(C) *as* *bq* *cr* *dp*

(D) *ar* *bp* *cq* *ds*

81. सम्मोदन्तेऽस्मिन् भूतानि ............... इति किम् ?

(A) मेघः (B) मदः

(C) मोदकम् (D) समुद्रम्

82. आचार्य शब्दस्य यास्कोक्तं निर्वचनं नास्ति :

(A) आचारं ग्राह्यति

(B) आचरणं शोधयति

(C) आचिनोत्यर्थान्

(D) आचिनोति बुद्धिम् इति

83. अधोनिर्दिष्टानां युग्मपर्यायेषु समीचीनं विचिनुत :

(*a*) अहमस्मि महामहः (*p*) परोक्षकृता ऋक्

(*b*) यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि (*q*) आध्यात्मिकी ऋक्

(*c*) इन्द्रो दिव इन्द्र ईशे पृथिव्याः (*r*) प्रत्यक्षकृता ऋक्

(*d*) कण्वा अभि प्र गायत (*s*) प्रत्यक्षकृत् स्तोता

(A) *as* *bp* *cq* *dr*

(B) *aq* *br* *cp* *ds*

(C) *ap* *bq* *cr* *ds*

(D) *ar* *bs* *cp* *dq*

84. रिक्तस्थानं पूरयत :

ब्रह्मणो भावः .............

(A) ब्रह्मभूयम् (B) ब्रह्मभाव्यम्

(C) ब्रह्मभव्यम् (D) ब्रह्मभुयम्

85. संप्रदानसंज्ञाविधायकं सूत्रं किम् ?

(A) चतुर्थी सम्प्रदाने

(B) परिक्रयणे सम्प्रदानमन्यतरस्याम्

(C) कर्मणा यमभिप्रैति स सम्प्रदानम्

(D) संप्रसारणस्य



Prepp Your Personal Exam Guide

www.prepp.in

Prepp
Your Personal Exams Guide



86. सत्यासत्यपर्यायेषु उचितं विचिनुत :

(*a*) 'उदवान् समुद्र:' इत्यस्य साधुत्वं नास्ति।

(*b*) पूर्वी इत्यत्र मत्वर्थीय: इनिप्रत्यय:।

(*c*) विद्युद्वान् इति साधु रूपम्।

(*d*) तपस्वी इत्यत्र इनिप्रत्यय:।

(A) सत्यम् सत्यम् असत्यम् असत्यम्

(B) सत्यम् असत्यम् सत्यम् असत्यम्

(C) असत्यम् असत्यम् सत्यम् सत्यम्

(D) सत्यम् असत्यम् असत्यम् असत्यम्

87. त्रिलोकी इत्यस्य साधुत्वं केन सूत्रेण ?

(A) उगितश्च (B) द्विगो:

(C) स्त्रियाम् (D) संख्याव्ययादेर्ङीप्

88. अधस्तनवाक्येषु सत्यासत्यपर्यायेषु समीचीनं विचिनुत :

(*a*) म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्।

(*b*) य: शब्दाञ्जानात्यसौ अपशब्दान् न जानाति।

(*c*) शब्दानां प्रतिपत्तौ प्रतिपदपाठ इत्येष अनभ्युपाय:।

(*d*) द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्।

(A) सत्यम् असत्यम् सत्यम् सत्यम्

(B) असत्यम् असत्यम् असत्यम् सत्यम्

(C) सत्यम् सत्यम् असत्यम् असत्यम्

(D) असत्यम् सत्यम् सत्यम् सत्यम्

89. रिक्तस्थानं पूरयत :

धकारस्य दकारे परिवर्तनं ..............।

(A) यास्कनियमत: (B) कात्यायननियमत:

(C) वेर्नरनियमत: (D) ग्रिमनियमत:

90. रिक्तस्थानं पूरयत :

यशोऽस्य अस्ति इति ..............।

(A) यशोवान् (B) यशोमान्

(C) यशस्वान् (D) यशस्मान्

91. प्राङ्मुखी इत्यत्र क: प्रत्यय: ?

(A) ङीप् (B) ङीन्

(C) ङीष् (D) ङी

92. सत्यासत्यपर्यायेषु उचितं विचिनुत :

(*a*) प्राज्ञ: इत्यत्र णप्रत्यय:।

(*b*) दन्तुर: इत्यत्र रप्रत्यय:।

(*c*) तुन्दिभ: इत्यत्र इभप्रत्यय:।

(*d*) उदधौ अर्थे द्योत्ये उदवान् इति साधु रूपम्।

(A) असत्यम् असत्यम् सत्यम् सत्यम्

(B) सत्यम् असत्यम् सत्यम् असत्यम्

(C) सत्यम् असत्यम् असत्यम् असत्यम्

(D) सत्यम् असत्यम् असत्यम् सत्यम्

Prepp Your Personal Exam Guide

www.prepp.in

Prepp
Your Personal Exams Guide



93. रिक्तस्थानं पूरयत :

पदानां त्रैस्वर्यं नाम ................ ।

(A) सर्वभारतीयभाषाणां व्याकरणविशेषः

(B) प्राचीनार्यभारतीयभाषायाः विशेषः

(C) प्राकृतभाषाविशेषः

(D) पालीभाषाविशेषः

94. समूहादसंगतं दूरीकुरुत :

(A) मराठी (B) हिंदी

(C) तामिळ (D) उर्दू

95. युग्मपर्यायेषु उचितं विचिनुत :

| | |
|---|---|
| (a) ब्राहुई | (p) सेमिटिकभाषा |
| (b) सन्थाली | (q) आर्यभारतीयभाषा |
| (c) सिंहली | (r) द्रविडभाषा |
| (d) अरबी | (s) मुण्डाभाषा |

| | | | | |
|---|---|---|---|---|
| (A) | *ar* | *bs* | *cq* | *dp* |
| (B) | *ar* | *bq* | *cs* | *dp* |
| (C) | *aq* | *bs* | *cp* | *dr* |
| (D) | *aq* | *br* | *cs* | *dp* |

96. 'देवी-माहात्म्य' रूपेण प्रसिद्धः 'दुर्गासप्तशती' ग्रन्थः कस्मिन् पुराणे पठितः ?

(A) देवीभागवतपुराणे (B) मार्कण्डेयपुराणे

(C) शिवपुराणे (D) भविष्यपुराणे

97. वायुपुराणे प्राधान्येन कस्य दैवतस्य स्तुतिरस्ति ?

(A) वायोः (B) विष्णोः

(C) शिवस्य (D) सूर्यस्य

98. पुराणसाहित्यस्य उत्पत्तिस्थलरूपेण प्रसिद्धमस्ति :

(A) पुष्करक्षेत्रम् (B) काशी

(C) नैमिषारण्यम् (D) कुम्भकोणम्

99. पुराणानां पञ्चलक्षणं प्रसिद्धम्। कस्मिन् महापुराणे दशकात्मकं पुराणलक्षणं प्राप्यते ?

(A) ब्रह्ममहापुराणे (B) भागवतमहापुराणे

(C) विष्णुमहापुराणे (D) वायुमहापुराणे

100. अधोर्निदिष्टेषु युग्मपर्यायेषु समीचीनं विचिनुत :

| | |
|---|---|
| (a) दूतवाक्यम् | (p) रामायणम् |
| (b) प्रतिमा | (q) कथासरित्सागरः |
| (c) स्वप्नवासवदत्तम् | (r) चारुदत्तम् |
| (d) मृच्छकटिकम् | (s) महाभारतम् |

| | | | | |
|---|---|---|---|---|
| (A) | *ap* | *bs* | *cr* | *dq* |
| (B) | *aq* | *br* | *cp* | *ds* |
| (C) | *as* | *bp* | *cq* | *dr* |
| (D) | *ar* | *bq* | *cs* | *dp* |

Prepp
Your Personal Exams Guide



## ROUGH WORK

Prepp Your Personal Exam Guide